# अष्टमः अभ्यासः

# अशुद्धिसंशोधनम्

**1. अधोलिखितानि वाक्यानि ध्यानेन पठत –**

(क) **सः** बालिका अस्ति।

(ख) **तौ** बालकाः क्रीडन्ति।

(ग) शिक्षकः सूचनां **वदन्ति**।

(घ) **श्वः** कार्यक्रमः अभवत्।

(ङ) त्वं पाठं **पठति**।

(च) क्रीडकः **कन्दुकं** क्रीडति।

(छ) माता **बालकं** मोदकं ददाति।

वयं पश्यामः यत् उपरितन-वाक्येषु रेखाङ्कितानि पदानि शुद्धानि न सन्ति। यदि ध्यानेन पश्यामः तर्हि अवगम्यते यत् एतेषु लिङ्ग-वचन-लकार-पुरुष-विभक्ति-दृष्ट्या दोषाः सन्ति। अतः सर्वदा अपि वाक्यनिर्माण-सन्दर्भे एते अंशाः अनिवार्यतया अवधातव्याः।

**2. अधुना उपरितन-वाक्यानां शुद्धरूपाणि पश्यामः –**

(क) **सा** बालिका अस्ति। (लिङ्गसम्बद्धः)

(ख) **ते** बालकाः क्रीडन्ति। (वचनसम्बद्धः-विशेषण-विशेष्यम्)

(ग) शिक्षकः सूचनां **वदति**। (कर्तृक्रियात्मकः वचनसम्बद्धः)

(घ) **ह्यः** कार्यक्रमः अभवत्। (लकारसम्बद्धः)

(ङ) त्वं पाठं **पठसि**। (पुरुषसम्बद्धः)

(च) क्रीडकः **कन्दुकेन** क्रीडति। (विभक्तिसम्बद्धः)

(छ) माता **बालकाय** मोदकं ददाति। (विभक्तिसम्बद्धः)

**3. अधोलिखितानि वाक्यानि संशोध्य लिखत – ( लिङ्गसम्बद्धानि वाक्यानि )**

(क) उत्तमा **बालकः** तत्र अस्ति। ..........................................

(ख) अद्य मम **मित्रः** गृहम् आगच्छति। ..........................................

(ग) **सुन्दरः** वातावरणम् अस्ति। ..........................................

(घ) **विशाला** जलधिः अस्ति। ..........................................

(ङ) **वृक्षं** छायां फलं च ददाति। ..........................................

**4. वचनसम्बद्धानि वाक्यानि –**

(क) <u>**सुन्दरी**</u> बालिकाः वार्तां कुर्वन्ति। ..............................

(ख) <u>**युवां**</u> पाठं पठसि। ..............................

(ग) तत्र <u>**निपुणः**</u> क्रीडकौ क्रीडतः। ..............................

(घ) अहं श्लोकान् <u>**स्मरामः**</u>। ..............................

(ङ) कार्यक्रमः उत्तमः <u>**अभवन्**</u>। ..............................

**5. लकारसम्बद्धानि वाक्यानि –**

(क) श्वः परीक्षा <u>**अभवत्**</u>। ..............................

(ख) अहं <u>**परह्यः**</u> विदेशं गच्छामि। ..............................

(ग) त्वं ह्यः कुत्र <u>**गमिष्यसि**</u>। ..............................

(घ) पुरा श्रीरामः अयोध्यायाः राजा <u>**अस्ति**</u>। ..............................

(ङ) राघवः परश्वः वेदपारायणम् <u>**अकरोत्**</u>। ..............................

**6. पुरुषसम्बद्धानि वाक्यानि –**

(क) यूयं लेखम् <u>**अलिखन्**</u>। ..............................

(ख) सः कार्यं <u>**कुरु**</u>। ..............................

(ग) वयं सर्वे संस्कृतेन सम्भाषणं <u>**कुर्वन्ति**</u>। ..............................

(घ) क्रीडकाः तत्र <u>**क्रीडत**</u>। ..............................

(ङ) <u>**भवन्तौ**</u> कस्य देशस्य नागरिकौ स्थः ? ..............................

**7. विभक्तिसम्बद्धानि वाक्यानि –**

(क) कृषकः <u>**ग्रामेण**</u> नगरं गच्छति। ..............................

(ख) राघवेन्द्रः <u>**लेखन्याः**</u> लिखति। ..............................

(ग) <u>**गणेशं**</u> मोदकं रोचते। ..............................

(घ) बालाः जन्तुशालायां <u>**जन्तवः**</u> पश्यन्ति ..............................

(ङ) छात्रः <u>**विद्यालये**</u> गच्छति। ..............................

## मिश्रितप्रश्नाः

**1. अधोलिखितवाक्येषु रेखाङ्कितशुद्धपदाय उचितं पदं चित्वा वाक्यानि पुनः लिखत –**

(क) भारति! तव अयं कोशः <u>**अपूर्वं**</u> विद्यते।

(i) अपूर्वः (ii) अपूर्वा (iii) अपूर्वाः (iv) अपूर्वाणि

(ख) नास्ति **रागसमानि** दु:खम्।

(i) रागसम: (ii) रागसमा (iii) रागसमम् (iv) रागसमे

(ग) बोधिसत्त्व: शिवीनां राजा **अभवम्**।

(i) अभव: (ii) अभवत् (iii) अभवम् (iv) अभवन्

(घ) राज्ञ: नेत्रदाननिश्चयं ज्ञात्वा अमात्या: **अवदत**।

(i) अवदत् (ii) वदिष्यति (iii) अवदम् (iv) अवदन्

(ङ) **अहम्** अपि तत् नेत्रं यथास्थानम् अस्थापयत्।

(i) स: (ii) त्वम् (iii) आवाम् (iv) ते

**2. अधोलिखितानि वाक्यानि त्रुटियुक्तानि सन्ति, भवन्त: एतानि संशोध्य लिखन्तु –**

(क) भूय: प्रीता: शक्र: वरम् अयच्छत्। ..........................................................

(ख) सरस्तीरे राजहंस: हंसी च विहरन्ति। ..........................................................

(ग) स: कथं माम् अपि अधिक्षिपसि। ..........................................................

(घ) मम केकारवं श्रुत्वा कोकिल: अपि लज्जामहे। ..........................................................

(ङ) युवां न तावत् कलहेन समयं वृथा यापयेत। ..........................................................

**3. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितं पदं चिनुत –**

(क) कस्मिंश्चित् नगरे चन्द्रो नाम भूपति **प्रतिवसत:** स्म।

(i) प्रतिवसति (ii) प्रतिवससि (iii) प्रतिवसामि (iv) प्रतिवसन्ति

(ख) सूपकाराणां मेषेण सह एष: कलह: नूनं भवतां विनाशकारणं **भवति**।

(i) अभवत् (ii) भवतु (iii) भविष्यति (iv) भवेत

(ग) यूथप: सर्वान् कपीन् आहूय रहसि **अवदम्**।

(i) वदति (ii) वदिष्यन्ति (iii) अवदन् (iv) अवदत्

(घ) कपय: प्रहस्य **अवदाम**।

(i) अवदत् (ii) अवदम् (iii) अवदन् (iv) वदिष्यन्ति

(ङ) ऊर्णाप्रचुर: **मेषौ** दाहवेदनया भूमौ लुठति।

(i) मेषम् (ii) मेष: (iii) मेषेण (iv) मेषेस्य

**4. एतानि त्रुटियुक्तानि वाक्यानि यूयं संशोध्य पुन: लिखत –**

(क) चञ्चल: हि मन: कृष्ण। ..........................................................

(ख) मनं दुर्निग्रहं चलं च भवति। ..........................................................

(ग) अयं पुरुष: पापं चरसि। ..........................................................

(घ) अग्नि: इव दहन्ति मामयं शोक:। ..........................................................

(ङ) नकुलः तव सारथिः भव। ........................................

**5. अधोलिखितवाक्येषु रेखाङ्कितानि पदानि अशुद्धानि सन्ति, विकल्पेभ्यः उचितं शुद्धं विकल्पं चिनुत –**

(क) मन्ये <u>**ते**</u> ब्रह्मास्त्रप्रयोगं न करिष्यति।

(i) सः (ii) त्वम् (iii) अहम् (iv) तौ

(ख) रे दुष्ट भीम! त्वम् अद्य <u>**वध्योऽस्मि**</u>।

(i) वध्योऽस्ति (ii) वध्योऽसि (iii) वध्यः सन्ति (iv) वध्यः स्मः

(ग) युधिष्ठिरार्जुनौ रथारोहणं <u>**नाटयति**</u>।

(i) नाटयन्ति (ii) नाटयथः (iii) नाटयतः (iv) नाटयामः

(घ) न जानाति भवान् द्रौणेः <u>**चपलं**</u> प्रकृतिम्।

(i) चपलाम् (ii) चपला (iii) चपलया (iv) चपलायाः

(ङ) प्रच्छन्नभाग्यस्य भार्या <u>**बुद्धिमान्**</u> आसीत्।

(i) बुद्धिमन्तः (ii) बुद्धिमन्तौ (iii) बुद्धिमती (iv) बुद्धिमत्यः

**6. अधोलिखितवाक्येषु काश्चन अशुद्धयः सन्ति। ताः अपाकृत्य वाक्यानि संशोध्य लिखत –**

(क) परद्रव्ये अनासक्तः सा न्यवेदयत्। ........................................

(ख) अहो विचित्रः स्वप्नं मया दृष्टः। ........................................

(ग) दुष्टबुद्धिः क्षेत्रं गता। ........................................

(घ) वाक्पटुः धैर्यवती मन्त्री न परिभूयते। ........................................

(ङ) वयं स्वागतं कुर्वन्ति। ........................................

**7. अधोलिखितवाक्येषु रेखाङ्किताशुद्धपदाय उचितं पदं चिनुत –**

(क) कृष्ण! मनः हि <u>**चञ्चलः**</u>।

(i) चञ्चलम् (ii) चञ्चला (iii) चञ्चल! (iv) चञ्चलानि

(ख) सः शस्यक्षेत्रे हलकार्यं कर्तुम् <u>**आरभे**</u>।

(i) आरभन्त (ii) आरभध्वम् (iii) आरभेताम् (iv) आरभत

(ग) 'साडकेन' एकम् अन्यत् पर्व <u>**सन्ति**</u>।

(i) अस्मि (ii) अस्ति (iii) असि (iv) स्तः

(घ) अहं <u>**जानासि**</u> इदं स्थानम्।

(i) जानाति (ii) जानन्ति (iii) जानामि (iv) जानीमः

(ङ) कालः भूतं वर्तमानं भविष्यदपि च <u>**वीक्षमाणं**</u> जगतः विकासस्य साक्षी भवति।

(i) वीक्षमाणानि (ii) वीक्षमाणा (iii) वीक्षमाणाः (iv) वीक्षमाणः